दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

**पञ्चाङ्गम्**
वि.सं. २०८३,
कलियुगाब्धः ५१२७ ग्रीष्म-ऋतुः
सूर्यः उत्तरायणम् ज्येष्ठशुक्लतृतीया
आषाढः 03 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-4 ■ वर्ष-5 ■ अङ्क-235 | 1 | जून 17, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 दिल्ली-आरक्षकदलस्य विशेष-प्रकोष्ठेन राजधान्यां सक्रियस्य पाकिस्तान-समर्थितस्य आतङ्कवादी-अपराधिक-जालस्य भङ्गः

3 Pinjore-Baddi-Nalagarh Four-lane: - पिञ्जौर-बद्दी-नालागढ-चतुर्ष्पंक्तिमार्गस्य लम्बमान-कार्याय पुनः उदिता आशा

4 अद्य श्रृङ्खला भविष्यति मुष्टौ, अफगानिस्तान-विरुद्धं द्वितीयम् एकदिवसीय-क्रिकेट्-क्रीडां क्रीडितुम् अवतरिष्यति भारतीयदलम्

## प्रधानमन्त्री मोदी जी-7 शिखर-सम्मेलने उच्चस्तरीय-कार्यसत्रे भागं गृहीतवान्



प्रधानमन्त्री नरेन्द्रमोदी जी-7 शिखर सम्मेलने भागं ग्रहीतुं द्विदिवसीय यात्रायां गतदिने फ्रांसदेशस्य एवियन-नगरं प्राप्तवान्। प्रधानमन्त्रिणः इयं अनवरतं सप्तमी जी-7 उपस्थिति वर्तते, सहैव अस्मिन् प्रमुखे बहुपक्षीय-आयोजने भारतस्य इदं त्रयोदशं सहभागित्वं वर्तते। इयं शिखर वार्ता भारतस्य कृते महत् सामरिक महत्त्वं भजते, यतो हि प्रधानमन्त्री वैश्विक पटले विकासशील-विश्वस्य समाह्वानानि दृढतया उपस्थापयिष्यति। गतसायङ्काले फ्रांस-देशस्य राष्ट्रपतिः इमैनुएल मैक्रॉन इत्यसौ प्रधानमन्त्रिणः औपचारिकं स्वागतं कृतवान्। ततः परं श्रीमोदी नूतन-सहभागिता-निर्माणं अथ अन्ताराष्ट्रिय एकतायाः सुदृढीकरणम्" इति मुख्य-विषयाधारिते उच्चस्तरीय उपवेशने भागं ग्रहीतवान्। "नूतन-सहभागितानां निर्माणं तथा च अन्तरराष्ट्रीय-एकजुटतायाः पुनर्निर्माणम्" इति विषये आयोजितायाम् अस्यां गोष्ठ्यां जी-7 देशानां, सहयोगी-देशानां तथा च विश्वबैंक-अफ्रीकी-विकासबैंकयोः प्रतिनिधयः सम्मिलिताः अभवन्। सः अकथयत् यत् भारतं श्रेष्ठाय समृद्धाय च भवितव्याय वैश्विक-सहयोगं वर्धयितुं कटिबद्धं वर्तते।

**ब्रातिस्लावायाम् आयोजितायाः 'वाराणसी-प्रदर्शिन्याः' प्रशंसां कुर्वन् प्रधानमन्त्री मोदी द्विपक्षीय-सम्बन्धानां सुदृढीकरणे कला-संस्कृतेः भूमिकां रेखांकितवान्।**

प्रधानमन्त्री नरेन्द्रमोदी प्रावोचत् यत्, कला-संस्कृत्योः जनान् आक्रष्टुं महती शक्तिर्भवति। प्रधानमन्त्री श्रीमोदी स्लोवाकिया-देशस्य राष्ट्रपतिः पीटर पेलेग्रिनी इत्येतौ विगतदिने स्लोवाकिया-देशस्य ब्रातिस्लावा-स्थिते राष्ट्रपति-प्रासादे वाराणसी-विषयाधारितां काञ्चन विशिष्टां चित्रकला-प्रदर्शिनीं दृष्टवन्तौ, यस्यां स्लोवाकिया-देशस्य एव कलाकारैः कृताः कृतयः प्रदर्शिताः आसन्। एतस्याः कलायाः कृते ब्रातिस्लावा-नगरे बनारस कनेक्ट् इति नाम प्रदाय प्रधानमन्त्रिणा स्लोवाक-कलाकाराणां सृजनात्मक प्रतिभायाः भूरिशः प्रशंसा कृता। विदेश-मन्त्रालयेन सूचितं यत्, इयं प्रदर्शिनी वाराणसी-नगरी इति विषयाधारिता आसीत्। अस्मिन् भारतस्य प्राचीनतमायाः जीवन्त नगर्याः आध्यात्मिकं, सांस्कृतिकं, अथ च सामान्य-जनजीवनं कलाकृतिभिः अतीव सुन्दरतया चित्रितम् आसीत्।

## कृषिमन्त्री शिवराजसिंहचौहानः खरीफ-ऋतोः सज्जानां समीक्षायाः कृते उच्चस्तरीयगोष्ठीं कृतवान्

कृषि-कृषक-कल्याणमन्त्री शिवराजसिंहचौहानः नवदिल्ल्याम् उच्चस्तरीय-कृषि-समीक्षागोष्ठ्यां खरीफ-२०२६ (Kharif 2026) ऋतोः कृते देशव्यापि-सिद्धतानां विस्तृतां समीक्षां कृतवान्। कृषि-मन्त्रालयेन उक्तं यत् अल-नीनो (El Nino) इत्यस्य सम्भावित-स्थितिं दृष्ट्वा सः कार्पास-उत्पादन-वर्धने, द्विदल-धान्येषु (दाल उत्पादने) आत्मनिर्भरता-प्राप्तौ तथा च न्यूनवर्षा-युक्तेषु जनपदेषु अग्रिम-आकस्मिक-योजनासु विशेषं बलं दत्तवान्। सः स्पष्टं सन्देशं दत्तवान् यत् प्रधानमन्त्रिणः नरेन्द्रमोदिनः मार्गदर्शने कृषकाणां हितानां रक्षणं सर्वकारस्य सर्वोत्तमा प्राथमिकता अस्ति। गोष्ठ्याम् अस्मिन् विषये ध्यानं केन्द्रितं कृतं यत् शस्य-ऋतौ उत्पद्यमानात् कस्यापि प्रतिकूल-ऋतु-स्थित्याः कृषेः कृषकाणां च रक्षणाय सर्वे आवश्यकाः उपायाः पूर्वमेव क्रियेरन्।

## नीट-यूजी पुनःपरीक्षायाः पूर्वं सर्वकारेण अस्य मासस्य द्वादश दिनाङ्कपर्यन्तं 'टेलीग्राम' प्रतिबन्धितम्; जून मासस्य त्रिंशत् दिनांकपर्यन्तं सन्देश-सम्पादन-सुविधा अपि निष्क्रिया भविष्यति




राष्ट्रीय-पात्रता-सह-प्रवेश परीक्षा NEET- इत्यस्याः पुनर्परीक्षा जूनमासस्य एकविंशति-तमे-दिनांके आयोजयिष्यते। परीक्षायाः पूर्वं भारत-प्रशासनेन टेलीग्राम सन्देश-प्रेषण-अनुप्रयोगः जूनमासस्य द्वाविंशतिदिनांकं यावत् प्रतिबन्धितः। राष्ट्रीय-परीक्षा-अभिकरणेन (NTA) तथा वैद्युत् एवं सूचना-प्रविधि-मन्त्रालयस्य निर्णयस्य स्वागतं कृतम्। अभिकरणस्य वक्तव्यानुसारेण, अयं प्रतिबन्धः पुनर्परीक्षादिनं तथा तदनन्तरकालं यावत् प्रभावि भविष्यति। अपि च टेलीग्राम-संस्थायै पूर्वप्रकाशित-सन्देशानां सम्पादन-सौविध्यम् अपि जूनमासस्य त्रिंशत्दिनांक -पर्यन्तं निष्क्रियं कर्तुं निर्देशः प्रदत्तः। एनटीए इत्यस्य मतानुसारम्, प्रश्नपत्र-भेदप्रसारं मिथ्या-अपवादान् तथा संघटित-प्रतिकृतिचौर-चक्राणां दुष्प्रवृत्तीः अवरोद्धम् एषः निर्णयः गृहीतः। छात्राणां हितरक्षणाय तथा परीक्षायाः निष्पक्षतायै एते उपायाः क्रियन्ते।

### संयुक्तराष्ट्रसुरक्षापरिषदः परिष्कारसम्बद्धाः प्रयासाः निष्फलाः भवेयुः यदि तस्य विस्तारः केवलम् अस्थायि-सदस्य-वर्ग-पर्यन्तमेव परिसीमितो भवति-भारतम्

भारतेन संचेतना प्रदत्ता यत् संयुक्तराष्ट्रसुरक्षापरिषदः परिष्कारसम्बद्धाः प्रयासाः निष्फलाः भवेयुः यदि तस्य विस्तारः केवलम् अस्थायि-सदस्य-वर्ग-पर्यन्तमेव परिसीमितो भवति। संयुक्तराष्ट्रसङ्घ भारतस्य स्थायिप्रतिनिधिः राजदूतः हरीश-पर्वथनेनी महोदयः सुरक्षापरिषदः परिष्कारविषये प्रचलितानाम् अन्तरसर्वकारीयवार्तालापानां सभायाम् एतद् अभ्यधात्। श्रीपर्वथनेनी अवदत् यत् यदि परिषदः विस्तारः केवलम् अस्थायिसदस्यवर्गे एव विधीयते, तर्हि सः परिष्कारप्रयासः न केवलम् अपर्याप्तः अपितु वस्तुतः विफलतामेव गमिष्यति। यतः तेन सुरक्षापरिषदः पञ्चस्थायि-सदस्यानां विद्यमानायाः निर्णयप्रक्रियायाः अधिकारसंरचनायाश्च किमपि मौलिकं परिवर्तनं न परिलक्ष्यते।

## सुभाषितम्

**उत्सवे व्यसने चैव,**
**दुर्भिक्षे राष्ट्रविप्लवे ।**
**राजद्वारे श्मशाने च,**
**यस्तिष्ठति स बान्धवः॥**
**(हितोपदेश, मित्रलाभ- ७३)**

अर्थात्- विवाह आदि उत्सवों में, आपत्ति में, अकाल में, राज्य के संकट में, राजद्वार में तथा श्मशान में जो साथ रहता है वह बान्धव है।




सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## विकसित-भारत-युवा-संसदसंवादे लोकसभाध्यक्षः लोकतन्त्रे जनसहभागितायाः महत्त्वस्योपरि बलं प्रदत्तवान्



नवदेहल्यां षड्विंशत्युत्तरद्विसहस्र-तमवर्षस्य 'विकसित-भारत-युवा-संसद् कार्यक्रमस्य प्रतिभागिभिः सह संवादं कुर्वन् लोकसभाध्यक्षः ओम् बिरला लोकतन्त्रे जनसहभागितायाः महत्त्वस्योपरि बलं प्रदत्तवान्। अध्यक्षमहोदयेन प्रतिपादितं यत् भारतस्य लोकतन्त्रं केवलं शासनप्रणाली एव नास्ति, अपितु एषा संवाद-सहमति-सहभागितानां काचित् जीविता परम्परा अस्ति।

# दिल्ली-आरक्षकदलस्य विशेष-प्रकोष्ठेन राजधान्यां सक्रियस्य पाकिस्तान-समर्थितस्य आतङ्कवादी-अपराधिक-जालस्य भङ्गः



**हिमसंस्कृतवार्ता, नवदेहली।**
दिल्ली-आरक्षकदलस्य विशेष-प्रकोष्ठेन राजधान्यां सक्रियस्य पाकिस्तान-समर्थितस्य आतङ्कवादी-अपराधिक-जालस्य भङ्गः कृतः, अस्मिन् प्रकरणे च सप्त जनाः बन्दिताः। आरक्षकाणाम् अनुसारम्, आरोपिणः पाकिस्ताने स्थितस्य नायकस्य शहजाद भट्टी तस्य सहयोगिनः अजमल गुर्जरस्य च निर्देशानुसारं कार्यं कुर्वन्तः आसन्।

**पञ्जाब-मार्गेण अस्त्र-शस्त्राणां आपूर्तिं कुर्वन्ति स्म**

आरक्षक-अधिकारिणा सूचनां दत्त्वा कथितं यत् एषः सङ्घः (गिरोह) पञ्जाब-मार्गेण पाकिस्तानात अवैध-शस्त्राणि, गोला-बारूदं, मादकद्रव्याणि च तस्करयित्वा दिल्ली-एनसीआर क्षेत्रे आपूर्तिं करोति स्म। आरक्षकैः पञ्च हस्तशस्त्राणि (पिस्तौल), ४१ सजीवाः कारतूस-गुलिकाः, सप्त चलभाष-यन्त्राणि एका स्कोर्पियो 'एसयूवी' कार-यानं च हस्तगतं कृतम्। एषः सङ्घः युवकान् स्वकीये जाले सम्मेलयितुं सामाजिक-माध्यमानां उपयोगं करोति स्म।

## सङ्घे के आरोपाः सन्ति

आरोपः अस्ति यत् नवयुवकाः शीघ्रं धनार्जनस्य लोभेन आपराधिक-जगतः चकाचौन्ध्ये पातिताः सन्तः अस्त्र-शस्त्राणां मादकद्रव्याणां च तस्करी-कार्ये संलग्नाः क्रियन्ते स्म। मई २०२६ तमे वर्षे विशेष-प्रकोष्ठेन (स्पेशल सेल) इयं गुप्तेक्षणा प्राप्ता यत् शहजाद भट्टी, अजमल गुर्जर च दिल्ली-एनसीआर क्षेत्रे बृहत्-अपराधिक-आतङ्कवादी-गतिविधीनां योजनां रचयतः।

# गाजियाबाद-नगरे राष्ट्रीयसेवकसंघस्य भव्यं पथ-सञ्चलनम्; अनुशासनेन राष्ट्रभक्त्या च गुञ्जितं नगरम्



हिमसंस्कृतवार्ता। उत्तरप्रदेशस्य औद्योगिक-नगरे गाजियाबादे राष्ट्रीयस्वयंसेवकसङ्घस्य (RSS) कार्यकर्तृभिः एकस्य विशालस्य भव्यस्य च पथ-सञ्चलनस्य आयोजनं कृतम्। अस्मिन् कार्यक्रमे शतशः स्वयंसेवकाः पारम्परिक-गणवेशे (पूर्णवेशे) सम्मिलिताः अभवन्। सञ्चलनस्य आरम्भात् पूर्वं स्वयंसेवकाः एकत्रिताः भूत्वा सङ्घस्य ध्वजारोहणं कृतवन्तः, ततः परं च परमपवित्रं भगवध्वजं प्रणम्य सञ्चलनस्य प्रारम्भः अभवत्। नगरस्य मुख्यमार्गेषु यदा स्वयंसेवकाः बद्धशृङ्खलायाम् अनुशासनेन सह पदसञ्चलनं कृतवन्तः, तदा दृश्यं अतीव आकर्षकं राष्ट्रभक्तिपूर्णं च आसीत्।
अनुशासनं देशभक्तिः च राष्ट्रभक्तिघोषः: पथ-सञ्चलनस्य समये स्वयंसेवकानां राष्ट्रभक्तिपूर्णैः जयघोषैः, सङ्घस्य घोष-वादनेन (Musical Band) च समग्रं गाजियाबाद-नगरं गुञ्जितम् अभवत्। नगरस्य नागरिकैः, विभिन्न-सामाजिक-संस्थानां प्रतिनिधिभिः च सञ्चलनमार्गस्य उभयतः स्थितानां स्वयंसेवकानां उपरि पुष्पवर्षां कृत्वा तेषां भव्यं स्वागतं कृतम्। : सम्पूर्णे कार्यक्रमे स्वयंसेवकानां मध्ये उच्चकोटिः अनुशासनम् अवलोकितम्, यत् समाजे एकतायाः राष्ट्रभक्तेः च सन्देशं प्रसारयति। सङ्घस्य आधिकारिक-सूत्रैः ज्ञातं यत् अस्य पथ-सञ्चलनस्य अग्रिमे चरणे आगामिनि २१ जून् दिनाङ्के एकस्य विशालस्य प्रकट-समारोहस्य (सार्वजनिक-महोत्सवस्य) आयोजनं निश्चितं जातम्। अस्मिन् प्रकट-समारोहे सङ्घस्य राष्ट्रिय-स्तरीयाः ज्येष्ठाः अधिकारिणः, प्रमुखाः विचारकाः च मुख्यवक्तृरूपेण उपस्थिताः भविष्यन्ति। अत्र स्वयंसेवकाः समाजस्य सम्मुखे विभिन्न-शारीरिक-कौशलानां प्रदर्शनं करिष्यन्ति तथा च राष्ट्रनिर्माणाय सङ्घस्य आगामि-योजनानां विषये चर्चां करिष्यन्ति।

# वर्ष २०१८ तः लम्बमानायाः किशाऊ-जलबन्ध-परियोजनायाः विवादः समाप्तः, हिमाचलाय प्रतिवर्षं ६०० कोटिरूप्यकाणां लाभः भविष्यति



**हिमसंस्कृतवार्ताः — शिमला ।** वर्ष २०१८ तः राष्ट्रियमहत्त्वस्य किशाऊ-जलबन्ध-परियोजना लम्बमाना आसीत्। मङ्गलवासरे केन्द्रीय-गृहमन्त्रिणः श्री-अमितशाह-महोदयस्य अध्यक्षतायाम् आयोजितायां गोष्ठ्याम् अस्याः परियोजनायाः सम्बद्धेषु विभिन्नेषु विषयेषु विस्तरेण चर्चा अभवत्। हिमाचलप्रदेशसर्वकारस्य पक्षतः अस्याम् उपवेशने राज्यस्य हितैः सम्बद्धः स्वपक्षः दृढतया उपस्थापितः। मुख्यमंत्री सुक्खुः अकथयत् यत् —

- पूर्वतन-भाजपा-सर्वकारस्य समये कृतेन सन्धिना अनुसारं उत्तराखण्ड-हिमाचलप्रदेशाभ्यां विद्युतूत्पादनस्य राशिः प्रायः ₹२.३० रूप्यकाणि प्रति-मात्रकं (यूनिट) वोढव्यम् आसीत्।
- अस्माकं सर्वकारस्य मतम् अस्ति यत् येभ्यः राज्येभ्यः अस्याः परियोजनायाः जलं प्राप्स्यते, तेभ्यः केन्द्रीयसर्वकारः अनुदानं ददाति, परन्तु येन जलेन विद्युतिकायाः उत्पादनं भविष्यति, तस्य सम्पूर्णं व्ययं राज्यसर्वकाराः वहेयुः इति न्याय्यं नास्ति। अतः वयम् एतस्यां व्यवस्थायां स्वासहमतिं प्रकटितवन्तः।
- विस्तृत-विचार-विमर्शानन्तरं इयं सहमतिः जाता यत् देहली, हरियाणा, राजस्थानं च मिलित्वा एतां परियोजनां अग्रे नेष्यन्ति।
- अस्यां परियोजनायां हिमाचलप्रदेशसर्वकारेण एकं रूप्यकमपि व्ययीकर्तव्यं न भविष्यति, राज्यं च अग्रिमेषु पञ्चसु वर्षेषु प्रतिवर्षं प्रायः ६०० कोटिरूप्यकाणां लाभं प्राप्स्यति।

मुख्यमंत्री ठाकुर-सुखविन्द्र-सिंह-सुक्खुः अकथयत् यत् हिमाचलप्रदेशस्य हितैः सह किमपि सन्धिं अकृत्वा स्वीकृतः अयं निर्णयः राज्यस्य आर्थिक-सुदृढतायाः आत्मनिर्भरतायाः च दिशि कश्चन मीलप्रस्तरः (मील का पत्थर) सिद्धः भविष्यति। अद्यतने दिवसे हिमाचलप्रदेशस्य ७५ लक्षमितानां भ्रातृ-भगिनीनां महती विजयः जाता अस्ति।

# चेस्टरहिलप्रकरणे वित्तीय-अनियमितेषु उच्चन्यायालयेन सर्वकाराय, भूतपूर्व-मुख्यसचिवाय संजयगुप्ताय च सूचनापत्रम् निर्गतम्

**हिमसंस्कृतवार्ताः - शिमला।** हिमाचलप्रदेश-उच्चन्यायालयेन बहुचर्चिते सोलन-स्थित-चेस्टरहिल-आवासीय-परियोजनायां अनामी-सम्पत्तीनां तथा च धारा-११८ इत्यस्याः उल्लङ्घनस्य निष्पक्षम् अन्वेषणं याचितुं प्रस्तावितायां जनहितयाचिकायां राज्यसर्वकारं तथा च भूतपूर्व-मुख्यसचिवं संजयगुप्तं समाविश्य सूचनापत्रं प्रसारितम्। प्रदेश-उच्चन्यायालयस्य मुख्यन्यायाधीशस्य गुरमीतसिंहसन्धावालियामहोदयस्य तथा च न्यायाधीशस्य बिपिनचन्द्रनेगीमहोदयस्य खण्डपीठेन याचिकायां प्रदत्तानां तथ्यानां अभिलेखानां च अवलोकनान्तरं प्रतिवादिभ्यः अग्रिमश्रवणं यावत् स्वपक्षोत्तरं प्रदातुं आदेशाः दत्ताः। शिमलायाः भूतपूर्व-उपमहापौरेण (डिप्टी मेयर) टिकेन्द्रसिंहपंवरेण उच्चन्यायालये एका जनहितयाचिका प्रस्तुता अस्ति।
याचिकायां इयं याचना कृता यत् अस्य प्रकरणस्य अन्वेषणं उच्चन्यायालयस्य न्यायाधीशानां पर्यवेक्षणे भवेत्। याचिकायां भूतपूर्व-मुख्यसचिवे संजयगुप्ते गम्भीराणाम् अनियमितानां आरोपाः आरोपिताः सन्ति। न्यायालयः सूचितः यत् राजस्वसचिवपदे आसीत् सः परियोजना-निर्मातॄणां पक्षे अवैधानिकान् निर्णयान् अकरोत्, यस्य प्रतिफलरूपेण सः परियोजना-निर्मातृभ्यः कोटिरूप्यकाणां भूमिं नाममात्र मूल्यं दत्त्वा क्रीतवान्। जनहितयाचिकायां हिमाचलप्रदेशसर्वकारस्य गृहसचिवः, राजस्वसचिवः, उपायुक्तः, वरिष्ठपुलीसाधीक्षकः (शिमला), नगर-आयुक्तः (सोलनन), नगरनिगमः (सोलनम्), उपमण्डलाधिकारी (सोलनम्) तथा च मैसर्ज एन. जी. एस्टेट चेस्टर हिल इत्येते प्रतिवादिनः कृताः सन्ति।

**अग्रिमविचारणा (श्रवणं) अन्या जनहितयाचिकया सह २२ जुलै दिनाङ्के भविष्यति**

अस्य प्रकरणस्य आगामिश्रवणं जनहितयाचिकया सह २२ जुलै दिनाङ्के भविष्यति। उल्लेखनीयं वर्तते यत् एतान् एव आरोपान् अधिकृत्य अन्या अपि एका याचिका उच्चन्यायालये विचाराधीना अस्ति, यस्यां याचिकाकर्ता अधिवक्ता विनयशर्मा प्रकरणस्य सी.बी.आई.-अन्वेषणं (केन्द्रीय-अन्वेषण-ब्यूरो) याचितवान्। याचिकाकर्त्रा अनामी-सम्पत्तीः अधिकृत्य गम्भीराः आरोपाः कृताः सन्ति।

# Pinjore-Baddi-Nalagarh Four-lane: -पिञ्जौर-बद्दी-नालागढ-चतुष्पंक्तिमार्गस्य लम्बमान-कार्याय पुनः उदिता आशा



**परियोजनायाः अवशिष्टकार्याय निविदा-प्रस्तुतेः मङ्गलवासरः आसीत् अन्तिमः दिवसः, १८ जून् दिनाङ्के एन.एच.ए.आई. उद्घाटयिष्यति निविदाम्**

हिमसंस्कृतवार्ताः — शिमला।

प्रायः एकवर्षात् लम्बमानस्य पिञ्जौर-बद्दी-नालागढ-चतुष्पंक्तिराजमार्ग-परियोजनायाः कार्यस्य पुनः गतिं प्राप्तुं आशा उदिता अस्ति। मङ्गलवासरे परियोजनायाः अवशिष्टकार्याय आयोजितायां निविदाप्रक्रियायां भागं ग्रहीतुम् अन्तिमः दिवसः आसीत्। अतः अधुना १८ जून् दिनाङ्के निविदा उद्घाटनीया अस्ति। तदनन्तरं निविदायाः वित्तीय-तकनीकी-मूल्याङ्कनस्य प्रक्रिया पूरयिष्यते। फलतः प्रक्रियायाः समाप्त्यनन्तरं भारतीय- राष्ट्रीयराजमार्ग-प्राधिकरणं ('एन.एच.ए.आई.') कार्यं प्रदास्यति। सूचनानुसारम्, अस्याः चतुष्पथ-परियोजनायाः निर्माणं पूर्वं कस्याश्चित् एकस्याः कम्पनी-माध्यमेन क्रियमाणम् आसीत्। परन्तु अनया कम्पन्या गते वर्षे कार्यं मध्ये एव त्यक्तम्। ज्ञायते यत् परियोजनायाः निर्माणम् अधुना ५० प्रतिशतं (पञ्चाशत् प्रतिशतं) अपि पूर्णं न जातम्। तत्रैव, २०२३ तमे वर्षे वर्षाकालस्य (मानसून) समये केषाञ्चित् सेतूनां तथा च निर्माणाधीनसेतोः समीपस्थभागेषु भूक्षयस्य (कटाव) स्थितिः उत्पन्ना आसीत्। यस्मिन् एन.एच.ए.आई. इत्यनेन अस्य सुरक्षा-अभिकल्पस्य (सेफ्टी डिजाइन) पुनः समीक्षा कारिता। ज्ञायते यत् चतुष्पथ-परियोजनायाः विषयः वित्तसम्बन्धि-स्थायिसमितिः ('स्टैण्डिङ्ग कमिटी ऑन फाइनेन्स') इत्यस्याः समक्षम् आसीत्, यया काश्चन आपत्तयः आरोपिताः आसन्।अतः एतासां समाधानं कृत्वा स्थायिसमित्या स्वपक्षतः हरितसङ्केतः (अनुमतिः) प्रदत्तः। एन.एच.ए.आई. कथयति यत् समितेः अनुशंसानाम् अनुसारं नदीतल-सुरक्षा (रिवरबेड सेफ्टी) सम्बन्धिनीः सर्वाः आवश्यकताः पूरिताः सन्ति। ज्ञायते यत् नदीतल-सुरक्षाकार्याणां मूल-अभिकल्पः परियोजना-परामर्शदात्रा सज्जीकृतः आसीत्। अधुना संशोधिताः सुरक्षा-उपायाः कीरतपुर-मर्रावाला-बद्दीसेतु-भुडबैरियर-रत्ताखुड्ड-बगबानिया-खेड़ा इति समाविश्य अष्टसु संवेदनशीलस्थानेषु प्रयोक्ष्यन्ते। अपरपक्षे, परियोजनायाः अवशिष्टकार्येभ्यः ५९४ कोटिरूप्यकाणां संशोधितराशिः 'एस.सी.एफ.' इत्यनेन स्वस्य १७ एप्रिल दिनाङ्कस्य उपवेशने स्वीकृतम् आसीत्। यस्मात् परं एन.एच.ए.आई. इत्यनेन परियोजनाकार्यं प्रति निविदाप्रक्रिया आरब्धा। मङ्गलवासरे निविदायाः अन्तिमः दिवसः आसीत्। अतः अधुना एन.एच.ए.आई. निविदायाः वित्तीय-तकनीकी-मूल्याङ्कनं करिष्यति। अस्य कृते मासद्वयतः मासत्रयपर्यन्तं समयः भवितुं शक्नोति। तदनन्तरं एन.एच.ए.आई. चित-संस्थायै कार्यं प्रदास्यति। परियोजनायाः अवशिष्टं कार्यं वर्षद्वये पूर्णं कर्तुं समयावधिः निर्धारिता अस्ति। सूच्यते यत् चतुष्पथ-परियोजनायाः अयं ३६ किलोमीटरमितः दीर्घः राजमार्गस्य (हाइवे) भागः अस्ति। यस्मिन् १७.३७ किलोमीटरमितः भागः हिमाचलप्रदेशे अवशिष्टश्च हरियाणाप्रदेशे अस्ति। अयं राजमार्गः उत्तरभारतस्य प्रमुखाणां औद्योगिकक्षेत्राणां मध्ये एकं क्षेत्रं सञ्चयति, औद्योगिकगतिविधिभ्यश्च अतीव महत्त्वपूर्णः मन्यते। विशेषोल्लेखनीयं यत् अस्याः परियोजनायाः निविदाप्रक्रिया २२ वारं स्थगितीभूता अस्ति। परियोजनायाः निर्माणं प्रायः एकवर्षात् अवरुद्धं वर्तते। गुजरात-स्थिता 'पटेल इन्फ्रास्ट्रक्चर लिमिटेड' इति कम्पनी जून् २०२५ मध्ये केवलं ४५ प्रतिशतं कार्यं संपूर्य परियोजनां मध्ये एव त्यक्तवती आसीत्। अस्मिन् एव क्रमे परियोजनायाम् राजमार्गपक्षे वस्तिभ्यः 'सर्विस लेन', द्वयोः नूतनसेत्वोः निर्माणं तथा च किलोमीटरद्वयमिता दीर्घ-मलवाहिनी-शृङ्खला (सीवरेज लाइन) सदृशाः अतिरिक्ताः सुविधाः अपि सम्मिलिताः कृताः सन्ति।

# भाजपादलं पुरातनवृत्तिं (ओ.पी.एस.) स्थगयित्वा 'यू.पी.एस.' इति आनेतुम् इच्छति - मुख्यमंत्री सुक्खूः



**हिमसंस्कृतवार्ताः — शिमला ।**

हिमाचलप्रदेशे पुरातन-वृत्ति-योजनां (ओ.पी.एस.) अधिकृत्य पुनः राजनीतिः आरब्धा। मुख्यमन्त्री सुखविन्दरसिंहसुक्खूः सामाजिक-माध्यमे (सोशल मीडिया) स्वकीयं विचारं प्रकटयन् आरोपम् अकरोत् यत् भाजपादलं ओ.पी.एस.-योजनां स्थगयित्वा यू.पी.एस.-योजनां आनेतुम् इच्छति। सः अवदत् यत् काङ्ग्रेससर्वकारः पुरातन-वृत्ति-प्रदानाय प्रतिश्रुतः (कटिबद्धः) अस्ति, परन्तु भाजपादलं कर्मचारी-विरोधि वर्तते।

सः अकथयत् यत्— "मम पिता कर्मचारी आसीत्, अहं च तस्य जीवनस्य सङ्घर्षं, दायित्वानि, परिवारार्थं कृतं त्यागं च अतीव समीपात् अपश्यम्। अतः अहं सुष्ठु अवगच्छामि यत् सेवानिवृत्तेः अनन्तरं सम्मानं तथा च आर्थिक-सामाजिक-सुरक्षा कस्यापि कर्मचारिणः महत्तमं धनं भवति। अनयैव धिया अस्माकं सर्वकारेण पुरातनवृत्तियोजा (ओ.पी.एस.-योजना) पुनर्स्थापिता (पुनःप्रवर्तिता)।" सः अवदत् यत् एतद् दुर्भाग्यपूर्णं वर्तते यत् भाजपादलं ओ.पी.एस. स्थगयित्वा यू.पी.एस. आनेतुम् इच्छति, परन्तु अस्माकं सर्वकारः कर्मचारिणां तेषां परिवाराणां च हितैः सह किमपि सन्धिं (समझौता) न भवितुं दास्यति। उल्लेखनीयं वर्तते यत् काङ्ग्रेसदलेन सत्तायाम् आगमनान्तरं मन्त्रिमण्डलस्य प्रथमे एव उपवेशने ओ.पी.एस.-योजना पुनः प्रवर्तिता आसीत्। अधुना आगामि-विधानसभा-निर्वाचनात् (चुनाव) पूर्वं अयं मुख्यः विषयः भवन् दृश्यते।

# HPBOSE - हिमाचल-बोर्ड-इत्यस्य दशमी-द्वादशी-कक्षयोः अनुपूरकपरीक्षाः जुलै-मासस्य ३ दिनाङ्कात्, समयसारिणी प्रसारिता

हिमसंस्कृतवार्ताः — धर्मशाला ।हिमाचलप्रदेश-विद्यालयीय-शिक्षा-मण्डलेन दशमी-द्वादशी-कक्षयोः अनुपूरकपरीक्षाणां (सप्लीमेंट्री) समयसारिणी (शेड्यूल) प्रसारिता। एताः परीक्षाः जुलै-मासस्य ३ दिनाङ्कात् आरप्स्यन्ते। विशेष-अवसरयुक्ताः (स्पेशल चांस) छात्र-छात्राः अपि एतासु परीक्षासु सम्मिलिताः भवितुं शक्ष्यन्ति। दशमी-कक्षायाः परीक्षाः जुलै-मासस्य ३ दिनाङ्कात् १० दिनाङ्कपर्यन्तं प्रचलिष्यन्ति। तत्रैव, द्वादशी-कक्षायाः परीक्षाः जुलै-मासस्य ३ दिनाङ्कात् १६ दिनाङ्कपर्यन्तं भविष्यन्ति। परीक्षायाः समयः प्रातः ८:४५ वादनतः मध्याह्ने १२:०० वादनपर्यन्तं निर्धारितः अस्ति। मण्डल-अध्यक्षेण राजेशशर्मणा एषा सूचना दत्ता। दशमी-कक्षायाः प्रश्नपत्राणि आङ्ग्ल-गणित-हिन्दी-सामाजिकविज्ञान-विज्ञान-प्रौद्योगिकी-संस्कृत-विषयाणां कृते 'ए', 'बी', 'सी' इति श्रेणीषु (सीरीज) भविष्यन्ति। द्वादशी-कक्षायाः कृते आङ्ग्ल-गणित-हिन्दी-अर्थशास्त्र (इकोनॉमिक्स)-राजनीतिविज्ञान (पॉलिटिकल साइंस)-इतिहास-भौतिकविज्ञान (फिजिक्स)-रसायनविज्ञान (केमिस्ट्री)-जीवविज्ञान (बायोलॉजी)-लेखाशास्त्र (अकाउंटेंसी)-व्यवसायाध्ययन (बिजनेस स्टडी)-संस्कृत-विषयेषु अपि 'ए', 'बी', 'सी' श्रेणीषु प्रश्नाः प्रक्ष्यन्ते। अन्येषां सर्वेषां विषयाणाम् अपि प्रश्नपत्राणि अस्मिन् एव प्रारूपे भविष्यन्ति। बहुविकल्पीयप्रश्नानां (MCQs) कृते परीक्षार्थिभ्यः ओ.एम.आर. (OMR) पत्रमपि प्राप्स्यते।

**दशमी-कक्षायाः समयसारिणी**

दशमी-कक्षायाः गणितविषयस्य परीक्षा जुलै-मासस्य ३ दिनाङ्के भविष्यति। जुलै-मासस्य ४ दिनाङ्के संस्कृत-पञ्जाबी-विषययोः परीक्षा अस्ति। आङ्ग्ल-हिन्दी-विषययोः परीक्षाः क्रमशः ६ तथा ७ जुलै-दिनाङ्कयोः भविष्यन्ति। विज्ञान-प्रौद्योगिकी, सामाजिकविज्ञान, गृहविज्ञान (होम साइंस), आई.टी.ई.एस. (ITES) तथा कम्प्यूटर-विज्ञान-विषयाणां परीक्षाः जुलै-मासस्य ८ दिनाङ्कात् १० दिनाङ्कपर्यन्तं प्रचलिष्यन्ति।

**द्वादशी-कक्षायाः समयसारिणी-** द्वादशी-कक्षायाः आङ्ग्लविषयस्य परीक्षा जुलै-मासस्य ३ दिनाङ्के अस्ति। ४ दिनाङ्के लेखाशास्त्र-(अकाउंटेंसी), भौतिकविज्ञानं (फिजिक्स) तथा संस्कृत-विषयाणां परीक्षाः भविष्यन्ति। इतिहास-जीवविज्ञान-राजनीतिविज्ञान-अर्थशास्त्र-हिन्दी-गणित-विषयाणां परीक्षाः जुलै-मासस्य ६ दिनाङ्कात् १० दिनाङ्कपर्यन्तं निर्धारिताः सन्ति। अवशिष्टाः परीक्षाः जुलै-मासस्य १३ दिनाङ्कात् १६ दिनाङ्कस्य मध्ये विभिन्नेभ्यः विषयेभ्यः आयोजयिष्यन्ते।






## सीबीएसई-विद्यालयेषु शिक्षकाणां नियुक्तिसूत्रं निश्चेतुम् अस्मिन् दिने भविष्यति उपवेशनम्

हिमसंस्कृतवार्ताः- शिमला ।हिमाचलप्रदेशे नूतनानां १५८ सीबीएसई- विद्यालयानां कृते सेवारतानां शिक्षकाणां नियुक्तिं प्रति प्रचलन्ती असमंजसस्थितिः इदानीं शीघ्रमेव स्पष्टा भवितुं शक्नोति। राज्यसर्वकारेण गठायाः मन्त्रिमण्डल-उपसमित्याः महत्त्वपूर्णा गोष्ठी जून मासस्य १९ दिनाङ्के आयोजयिष्यते, यस्यां सीबीएसई- विद्यालयेषु शिक्षकाणां नियुक्तये अन्तिमसूत्रं निश्चितं भवेत् इति सम्भावना अस्ति। उपवेशनस्य अध्यक्षता उपमुख्यमन्त्री मुकेश अग्निहोत्री करिष्यति, यदा तु शिक्षामन्त्री रोहित ठाकुरः, तान्त्रिकशिक्षामन्त्री राजेश धर्माणी च अपि अस्मिन् उपस्थिताः भविष्यन्ति। राज्यस्य सहस्राणां शिक्षकाणां शिक्षाविभागस्य अधिकारिणां च दृष्टयः अस्याः गोष्ठ्याः उपरि स्थिताः सन्ति। उपवेशने एतत् निश्चितं करिष्यते यत् सीबीएसई-विद्यालयेषु कार्यरतशिक्षकाणां नियुक्तिः कस्मिन् आधारे भविष्यति। गतदिवसेषु आयोजितायां मन्त्रिमण्डलस्य गोष्ठ्यां कार्यरतशिक्षकाणां नियुक्तिं स्वीकृत्य सर्वकारस्य पुरतः नूतनः प्रशासनिकः विघ्नः उत्पन्नः अभवत्। मन्त्रिणः शिक्षासचिवेन दत्तां प्रस्तुतिं विरुध्य विविधान् परामर्शान् आपत्तीः च पञ्जीकृतवन्तः। तदनन्तरं सर्वकारेण अन्तिमनिर्णयः इदानीं स्थगितः कृतः तथा च एका समितिः गठिता। एषा समितिः निश्चितं करिष्यति यत् सीबीएसई-पाठ्यक्रमयुक्तेषु सर्वकारीय-विद्यालयेषु केषां शिक्षकाणां नियुक्तिः करणीया। प्रदेशस्य विविधविद्यालयेषु कार्यरतेषु शिक्षकेषु ५६२३ शिक्षकान् सीबीएसई-विद्यालयेषु नियुक्तुं योजना आसीत्। एतदर्थं शिक्षाबोर्ड- धर्मशाला- माध्यमेन शिक्षकाणां परीक्षा गृहीता आसीत्। अस्यां 'स्क्रीनिंग' परीक्षायां आहत्य ९८२१ शिक्षकाः सम्मिलिताः अभवन्। तेषु ६०८४ शिक्षकाः योग्यतासूच्यां स्थानं प्राप्तवन्तः। एतेषां परामर्शाय निर्देशालयेन गते मासे समयसारणी अपि प्रसारिता आसीत्। तथापि, पश्चात् पञ्चायतीराज-निर्वाचनानां कारणं प्रदर्श्य सा समयसारणी स्थगिता आसीत्।

## "लौकिकन्यायकोशः"
## "अदग्धदहनन्यायः"

अग्निः अदग्धं वस्तु दग्धुं शक्नोति परन्तु स एव अग्निः पूर्वमेव दग्धं वस्तु दग्धुं न शक्नोति इत्यर्थे अस्य न्यायस्य प्रयोगः भवति।
'इको झल्' (१-२-९) इत्यस्य पाणिनि- सूत्रस्य भाष्ये पतञ्जलिमुनिना अस्य प्रयोगः कृतः।

डा. वर्षा प्रकाश टोणगांवकर
पुणे/ महाराष्ट्रम्



# जी-7 शिखर-सम्मेलने भारतेन सह उदीयमान-शक्तीनां सहभागिता

## वैश्विक-व्यवस्थायां जायमानान् परिवर्तनान् स्पष्टरूपेण दर्शयति- कनाडा-देशस्य प्रधानमन्त्री



कनाडा-देशस्य प्रधानमन्त्री मार्क कार्नी कथितवान् यत् फ्रांस-देशे आयोजिते जी-7 शिखर-सम्मेलने भारतेन सह उदीयमान-शक्तीनां सहभागिता वैश्विक-व्यवस्थायां जायमानान् परिवर्तनान् स्पष्टरूपेण दर्शयति। सः बलं दत्त्वा अवदत् यत् जी-7 समूहः इदानीं एकाकी एव अन्तरराष्ट्रीय-विषयेषु प्रभुत्वं स्थापयितुं वा जगति शासनं कर्तुं वा दावं कर्तुं न शक्नोति। प्रधानमन्त्री कार्नी अवदत् यत् अद्यतने जगति जी-7 समूहेन स्वकीयायाः पुरातन विचारधारायाः अग्रे गन्तव्यं भविष्यति। भारतसदृशानाम् उदीयमान-देशानां सम्मिलनम् अस्य समूहस्य नूतनं वास्तविकतां व्यावहारिकं दृष्टिकोणं च प्रदर्शयति।
कार्नी स्पष्टीकृतवान् यत् आर्थिक-अस्थिरता, ऋतु-परिवर्तनं (जलवायु परिवर्तनं), स्वास्थ्य-सुरक्षा, भू-राजनैतिक-तनावः च एतादृशीनां वैश्विक-आह्वानानां समाधानं तदैव सम्भवं भवति, यदा पारम्परिक-जी-7 स्वरूपात् अग्रे गत्वा व्यापकः अन्तरराष्ट्रीय-सहयोगः सुनिश्चितः क्रियेत। यदि जी-7 समूहेन कदाचित् जगति शासनं कृतमपि आसीत्, तर्हि इदानीं सः तथा न करोति, न च एतादृशं ढोंगं (प्रदर्शनं) कर्तुं शक्नोति।

हिमसंस्कृतवार्ताः, ईदरधीरजः,हैदराबादः

## वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये। अद्य मया एका अतीव विचित्रा वार्ता पठिता। कश्चन प्रशिक्षणार्थी सद्यः सन्देशमाध्यमेन वेतनवृद्धये याचनां कृतवान् अस्ति। तस्मात् कारणात् सः स्वामिना कार्यालयात् निष्कासितः।
**काव्या-** सत्यम्, केवलं वेतन-याचनायै कस्यचित् निष्कासनं क्रूरं कार्यं वर्तते। मया अन्तर्जाले अपरः एकः मनोरञ्जकः दृश्यखण्डः दृष्टः। सहारा- मरुभूमि- मध्ये उष्ट्रारोहण-समये अपि एकेन पुरुषेण उत्सङ्ग-सङ्गणकेन कार्यं कृतम्। एतत् चित्रं दृष्ट्वा अन्तर्जाले जनाः बहु हसितवन्तः सन्ति।
**नन्दिनी-** आम्, मरुभूमौ अपि कार्य-निर्वहणं मनुष्यस्य अति-कार्य-व्यग्रतां दर्शयति।
काव्ये, त्वया अन्यद् एकं महत् वृत्तं श्रुतं वा? एवरेस्टपर्वते त्रिंशद्वर्षेभ्यः पूर्वं मृतस्य कस्यचित् भारतीय-पर्वतारोहकस्य मृतदेहः अस्ति, यः 'हरित-पादत्राणः' इति प्रसिद्धः। तस्य देहस्य पुनर्प्राप्तये भारतीय-सुरक्षाबलैः एकः प्रयासः आरब्धः।
**काव्या-** एतत् अतीव आश्चर्यकरं कार्यं वर्तते। नन्दिनि, मया एका अन्या प्रेरणादायिनी वार्ता प्राप्ता। दक्षिण-कोरियादेशस्य एकाशीतिवर्षीया एका वृद्धा महिला विश्वसुन्दरी-प्रतियोगितायां भागं गृहीतवती अस्ति। यद्यपि तया मुख्य-विजयः न प्राप्तः, तथापि सा 'सर्वोत्तम-वेशभूषा-पुरस्कारेण' सम्मानिता।
**नन्दिनी-** सत्यम्, उत्साहाय वयः कदापि न बाधायै इति एतया वृद्धया दर्शितम्। अद्यतनः वार्ताकार्यक्रमः अत्रैव समाप्तः। पुनर्मेलिष्यामः। धन्यवादः।

## जनसङ्ख्या-गणना २०२७: त्रयोविंशति-राज्येषु केन्द्रशासितप्रदेशेषु च जनगणनायाः प्रथमः चरणः सम्पन्नः



नवदिल्ल्याम्। हिमाचलप्रदेशे जनसङ्ख्या-गणना-२०२७ इत्यस्याः प्रथमचरणान्तर्गतं गृहाणां स्व-गणनायाः (Self-enumeration) अवधिः समाप्ता। ततः परं जनगणनाकर्मचारिभिः गृहं गृहं गत्वा गणनाकार्यं मङ्गलवासरात् आरब्धं, यत् १५ जुलाई पर्यन्तं प्रचलति। अपरपक्षे, केरले नागालैण्ड-राज्ये च स्व-गणना-सुविधा मङ्गलवासरात् आरब्धा, या ३० जून पर्यन्तं प्रचलिष्यति। एतेषु राज्येषु जनगणनाकर्मचारिभिः गृहं गृहं गत्वा गृहाणां गणनाकार्यं १ जुलाईतः ३० जुलाई पर्यन्तं करिष्यते। साम्प्रतं गुजराते, जम्मू-कश्मीरे, लद्दाखे, पुडुचेर्यां तथा च उत्तरप्रदेशे गृहं गृहं गत्वा गृहाणां गणनाकार्यं प्रचलति। अस्मिन् अन्तराले १६ मईतः १४ जून पर्यन्तं महाराष्ट्र-मेघालय-राजस्थान-झारखण्ड-राज्येषु तथा च राष्ट्रियराजधानीक्षेत्र-दिल्ल्याः देहली-नगरनिगम-(एमसीडी)-क्षेत्रे गृहसूचीकरणस्य गृहाणां च गणनाकार्यं सफलतापूर्वकं पूर्णम् अभवत्। पञ्जाबे अपि एतत् कार्यं १३ जून दिनाङ्के सम्पन्नम्। अद्यावधि त्रयोविंशति-(२३) राज्येषु केन्द्रशासितप्रदेशेषु च—अण्डमान-निकोबार-द्वीपसमूहेषु, आन्ध्रप्रदेशे, अरुणाचलप्रदेशे, बिहारे, चण्डीगढे, छत्तीसगढे, दादरा-नगरहवेली-दमण-दीवयोः, दिल्ल्यां, गोवायाम्, हरियाणायां, झारखण्डे, कर्णाटके, लक्षद्वीपे, मध्यप्रदेशे, महाराष्ट्रे, मेघालये, मिजोरामे, ओडिशायां, पञ्जाबे, राजस्थाने, सिक्किमे, तेलङ्गानायां तथा च उत्तराखण्डे जनगणनायाः प्रथमचरणस्य कार्यं परिसमाप्तं वर्तते।

## अद्य शृङ्खला भविष्यति मुष्टौ, अफगानिस्तान-विरुद्धं द्वितीयम् एकदिवसीय-क्रिकेट्-क्रीडां क्रीडितुम् अवतरिष्यति भारतीयदलम्

भारतं बुधवासरे लखनऊ-नगरस्य 'भारतरत्न-श्रीअटलबिहारीवाजपेयी-एकाना-क्रीडाङ्गणे' अफगानिस्तान-विरुद्धं द्वितीये एकदिवसीय-द्वन्द्वे (वनडे) त्रि-क्रीडानां शृङ्खलां जेतुं प्रयासं करिष्यति। प्रथमे द्वन्द्वे श्लाघनीयां विजयं प्राप्य भारतं १-० अङ्कैः अग्रे अस्ति। अपरपक्षे, अफगानिस्तान-दलस्य कृते शृङ्खलायां स्थातुम् अयं विजयः आवश्यकः वर्तते। प्रथमे एकदिवसीय-मैच-मध्ये रहमानुल्लाह-गुरबाजस्य उत्कृष्टं शतकं विहायापि तस्य दलस्य कन्दुकताडनम् (बल्लेबाजी) शिथिलं जातम् आसीत्। अतिथि-दलं तस्मात् व्यक्तिगत-उत्कृष्ट-प्रदर्शनात् आत्मविश्वासं तु प्राप्स्यति, परन्तु एकस्मै सुदृढाय भारतीयदलाय आह्वानाय तेभ्यः अधिकस्य सामूहिक-प्रयासस्य आवश्यकता भविष्यति। प्रथमे द्वन्द्वे उभयोः दलयोः क्षमतायाः स्पष्टः भेदः परिलक्षितः—यत्र गुरबाजस्य तीव्र-कन्दुकताडनेन अफगानिस्तान-दलेन उत्तमः धावनाङ्कः (स्कोर) निर्मितः, तत्रैव तस्य क्रीडाच्युतौ (आउट) सत्यां दलस्य पाळी (पारी) वेगेन विच्छिन्ना अभवत्। अस्य विपरीतम्, भारतेन सारल्येन लक्ष्यं प्राप्तम्, येन तस्य कन्दुकताडनस्य गम्भीरता, रणनीतिकं परिवर्तनशीलं च उभयमेव सिद्धम् अभवत्। शुभमन-गिलः शीर्षक्रमे (टॉप ऑर्डर) स्वकीयं श्रेष्ठं रूपं निरन्तरं प्रदर्शितवान्। ईशान-किशनस्य तृतीयक्रमे प्रेषणेन मध्य-ओवर-क्रीडासु आक्रामकता आगता, यदा च क्रीडा-समापकत्वेन (फिनिशर) के.एल. राहुलस्य भूमिका सद्यः फलदायिनी सिद्धा अभवत्; सः निम्न-मध्यक्रमे शान्तं विश्वस्तं च प्रदर्शनं कृतवान्।